International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(6): 193-195
© 2025 IJMH
www.themultijournal.com
Received: 13-12-2025
Accepted: 29-12-2025
Publish : 30-12-2025

**Dr. Gurupada Roy**
Medinipur, (west bengal)

**Correspondence:**
**Dr. Gurupada Roy**
Medinipur, (west bengal)

# महाकवि-कालिदासविरचितमभिज्ञानशाकुन्तले नायिकालङ्कारविमर्शः

**Dr. Gurupada Roy**

अभिज्ञानशाकुन्तलम् संस्कृतसाहित्यस्य अत्यन्तप्रसिद्धं नाटकं यत् कालिदास विरचितम् अस्ति। एतत् नाटकं रूपकप्रकारेषु श्रेष्ठतमं मन्यते तथा च भारतीयनाट्यपरम्परायाः गौरवमपि वर्तते। अस्य कथावस्तु महाभारताद् गृहीता अस्ति, किन्तु कविना स्वकवित्वेन तस्य सौन्दर्यं बहुगुणितं कृतम्। अस्य नाटकस्य प्रमुखा नायिका शकुन्तला, या कण्वमहर्षेः आश्रमे वर्धिता, अत्यन्तसुन्दरी, कोमला च स्वभावेन अस्ति। राजा दुष्यन्तः तां दृष्ट्वा तस्याः प्रेम्णि निमग्नः भवति। अस्मिन् नाटके प्रकृतिवर्णनम्, मानवीयभावानां सूक्ष्मचित्रणम्, तथा रस-ध्वन्यादीनां अद्भुतः समन्वयः दृश्यते। विशेषतः श्रृङ्गाररसस्य उत्कर्षः अत्र प्रमुखतया प्रकाशते। अतः अभिज्ञानशाकुन्तलम् केवलं नाटकं न, अपि तु संस्कृतसाहित्यस्य अमूल्यरत्नम् इति प्रसिद्धम्। नाटकेऽस्मिन् नायिकालङ्कारविमर्शः क्रियते।

अभिज्ञानशाकुन्तलमिति नाटके युगपदेव सामाजिक-सांस्कृतिक- अभिज्ञानशाकुन्तलं नाम मनोवैज्ञा- निकतथ्यानां समावेशो दाक्ष्येण कविना व्यधायि। नारीमनोविज्ञानस्य परीक्षकोऽयं महानुभावो नाटकस्यास्य नायिकारूपेण भरतकुलप्रसविनीं शकुन्तलां स्वीचकार । शकुन्तलाया नायिकारूपेण यदौदात्यं, नारीजनोचितं च माधुर्यमनेन चित्रितं, तन्नितरां प्रेक्षावद्भ्यः स्पृहास्पदम्। अत्रत्या नायिका मुग्धा कुसुममृद्वी, सर्वास्वपि संस्कृतसाहित्यचर्चितासु नायिकासु विशिष्टा, महिष्ठा चास्ति। साहित्यिकै -र्लक्षणनिर्धारकैर्यानि लक्षणानि नायिकावैशिष्ट्योपपत्तये निर्धारितानि तेषां प्रायेण समेषामेव शकुन्तलायां सङ्गतिर्भवति। अत्र नायिकाया महत्त्वद्योतकाः केचन अयत्नजाः स्वभावजाश्चालङ्काराः परिशील्यन्ते येषां स्थितेः शकुन्तलायाः अनवद्यं नायिकात्वं परमां प्रतिष्ठामाप्नोत्। नायिकाया अलङ्काराणाञ्चर्चा प्रायेण सर्वेष्वपि लक्षणग्रन्थेषु लभ्यते, तेष्वपि भारतीये नाट्यशास्त्रे, दशरूपके च एतद्विवरणं विशेषतः सुस्पष्टमवलोक्यते। युवावस्थायां तरुणीषु नायिकासु विंशतिरलङ्काराणां स्थितिरवलोक्यते। एते सत्त्वजा अलङ्कारा दशरूपककृता वर्गीकृताः। ते च यथा-

**यौवने सत्त्वजाः स्त्रीणामलङ्कारास्तु विंशतिः।**
**भावो हावश्च हेला च त्रयस्तत्र शरीरजाः॥**
**शोभा कान्तिश्च दीप्तिश्च माधुर्यं च प्रगल्भता।**
**औदार्यं धैर्यमित्येते सप्त भावा अयत्नजाः॥**
**लीला विलासो विच्छित्तिर्विभ्रमः किलकिञ्चितम्।**
**मोट्टायितं कुट्टमितं विव्वोको ललितं तथा॥**
**विहृतं चेति विज्ञेया दशभावाः स्वभावजाः।**
**निर्विकारात्मकात् सत्त्वात् भावास्तत्राद्यविक्रिया॥**[1]

एतेऽत्र शरीरजाः, अयत्नजाः, स्वभावजाश्चेति वर्गभेदेन धनञ्जयेन निरूपिताः। एतेष्वेव केषाञ्चन मुख्यभावानां, येषां शकुन्तलायाश्चेष्टाव्यापारादिषु प्रतिफलनं सर्वथा सम्पन्नं, तेषां समीक्षणं विधीयते।अनुल्बणत्वम् माधुर्यम् - यस्मिन् गुणे अवस्थिते सति प्रत्येकमवस्थायां नायिका रमणीया प्रतिभाति। असौ गुणो माधुर्यमिति निगद्यते। शकुन्तलाया माधुर्यावेदकमेतत्पद्यं शाकुन्तलीयं नितरां लक्ष्याभिमुखं प्रतिभाति। तद्यथा-

**सरसिजमनुविद्धं शैवलेनापि रम्यं मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।**
**इयमधिकमनोज्ञा वल्कलेनापि तन्वी किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥**[2]

**उक्तञ्चात्र किशोरकेलावपि-** 'मधुराणां स्वभावतः सर्वजनाह्लादिनीना-माकृतीनां किमिव वस्तु मण्डनं भूषणं न भवत्यपितु यावद् वस्तुमात्रमपि मण्डनं भवत्येव।' एतत्पद्यं शकुन्तलायाः सर्वास्ववस्थासु अनपहृतमाधुर्यं निवेदयति।

**रूपोपभोगतारुण्यैः शोभाङ्गानां विभूषणम् -** रूपादिभिर्यदा नायिकायाः सौन्दर्यं प्रतिक्षणं वर्धमानं लोकोत्तराह्लाद- जनकं वीक्ष्यते, तदायमलङ्कारः सम्पन्नतामेति। अस्य निदर्शनरूपेणाभिज्ञानशाकुन्तलस्येदं पद्यं समीक्ष्यम्-

**अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-**
**रनाविद्धं रत्नं मधुनवमनास्वादितरसम्।**
**अखण्डं पुण्यानां फलमिह च तद्रूपमनघं**
**न जाने भोक्तारं कमिह समुपस्थास्यतिविधिः।**[3]

एवञ्चायमपि श्लोकः शकुन्तलायाः शोभालङ्कारं लक्षयति। अत्र स्पष्टतोऽङ्गानां लोकोत्तरा आकृष्टिरनुवर्णिता-

**अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।**
**कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्॥**[4]

अत्र कविना अङ्गशब्दो बहुवचनान्तः साभिप्रायः प्रयोजितः। तस्यायमभिप्रायो यत्- 'अङ्गेष्विति बहुवचनेन वदने कान्तिमत्वम्, नेत्रयोरनुरागः, कण्ठे कम्बुसाम्यम्, त्रिरेखावत्वञ्च, कुचयोरौन्नत्यं, नाभी निम्नत्वम्, नितम्बे मध्यनिम्नत्वम्, मांसलत्वञ्च, जघनजङ्घाजानुषु मांसलत्वम्, ऊर्वोर्विशालत्वं, मृदुलत्वं शीतलत्वञ्च, पदयोर्मदालसत्वमित्यादि सूच्यते।"[5] एवञ्चात्र यत्कुसुममिति एकवचनान्तं पदं प्रयुक्तं तस्याभिप्रायोऽयमस्ति यत् सकलाया अपि पुष्पजातेः (पाटला-मल्लिका यूथिका-कमलादीनाम्) यत् स्वाभाविकं सौषम्यं तत्सर्वमप्यत्र युगपद् विद्यते नायिकानाम्।

**निर्विकारात्मकात् सत्त्वात् भावस्तत्राद्यविक्रिया-** जन्मनो यस्य मनोविकाररहितं, विकारहेतौ सत्यपि न भवति यन्मनसि विक्रिया, ते धीरा उच्यन्ते, तथा तेषामेतत् सामर्थ्यं सत्त्वमुच्यते, 'विकारहेतावपि विक्रियन्ते येषां न चेतांसि त एव धीरा इत्यादि निर्देशात्। निर्विकारे चेतसि विकृतिभाव आद्यो 'भाव' इति नायिकालङ्कार उच्यते। अत्र शाकुन्तले यथास्य निदर्शनं- किन्नु खल्विमं जनं प्रेक्ष्यतपोवनविरोधिनो विकारस्य गमनीयाऽस्मि संवृत्ता।"[6]

शकुन्तला आत्मनि एवात्मना वदति, यदिमं जनं नायकं दुष्यन्तमवलोक्य तपोवनविरोधिनोऽर्थात्तपोवनोचितपावित्र्यसद्भावादिविपरीतभावस्य मनोविकारस्यास्पद-मस्मन्मानसं जातम्। अत्रायं शकुन्तलायां भावालङ्कारस्याद्योऽवतारः कविना परिशीलितः।

**मन्यथामापितच्छाया सैव कान्तिः -** प्रणयावेगात् कामभावाद् वा यदा कलेवरस्य कमनीयता वर्धमाना वीक्ष्यते नायिकायास्तदा कान्तिरित्यलङ्कारो नायिकोचितोऽवगम्यते। यथास्याः शकुन्तलायाः देहसौषम्यं वृद्धिमुपगतमाभाति-स्तनन्यस्तोशीरं प्रशिथिलमृणालैकवलयं प्रियायाः सा बाधं तदपि कमनीयं वपुरिदम्। समस्तापः कामं मनसिजनिदाघप्रसरयोर्न तु ग्रीष्मस्यैवं सुभगमपराद्धं युवतिषु।।[7]

शकुन्तलायाः कमनीयं कलेवरमिदानीमंशुघाततप्तकलेवरोपमं प्रतिभाति कामावेशातिशयात्। वलयादीनां शैथिल्यं तस्या मन्मथावेशजनितं शैथिल्य-मस्वास्थ्यं वा सूचयति। एतस्यामवस्थायामपि नायिकेयं रमणीया प्रतिभाति, तत्कारणं रम्यत्वजनकोऽलङ्कारः कान्तिरिति विज्ञेयं प्रेक्षावद्भिः।

**दीप्तिः कान्तेस्तु विस्तरः -** कान्तिरेव यदा प्रकामं विस्तारमवाप्ता भवति, तदा सा दीप्तिर्द्युतिर्वा प्रोच्यते। शकुन्तलायां शनैः शनैर्दीप्तिरुद्भवति । तथा सति तस्याः का अवस्था भवतीत्यस्य निदर्शनं कविना पद्येनानेन कृतम्-

**क्षामक्षामकपोलमाननमुरः काठिन्यमुक्तं स्तनं**
**मध्यः क्लान्ततरः प्रकामविनतावंसौ छविः पाण्डुरा।**
**शोच्या च प्रियदर्शना च मदनग्लानेयमालक्ष्यते**
**पत्राणामिव शोषणेन मरुता स्पृष्टा लता माधवी॥**[8]

यदा नायिकायां कामोद्वेगलक्षणानि सामस्त्येन लक्षितानि भवन्ति, अथ च कामज्वरावेशात्तदीयं शरीरमन्यथाभावं प्रतिपद्यते, तदा अलङ्कारोऽयं दीप्ति-रित्याख्यश्चकास्ति।

**तत्कालिको विशेषस्तु विलासोऽङ्गक्रियादिषु -** यदा नायिका नायकेन सस्पृहमवलोक्यते, नायिकायाः मुख- चरण-कुच-जघनादीनि नायकेन साभिप्रायं परामृश्यन्ते, तदा नायकमेवं विधं पश्यन्तमवलोक्य नायिकाया आकृती, वीक्षणे, व्यापारचेष्टादिषु किमप्यपूर्वं वैशिष्ट्यमाविर्भवति । एवंविधो विशेष एव विलासालङ्कारः प्रोक्तः। तच्च यथा नायिकायां शकुन्तलायामालोचनीयम्-

**सन्दष्टकुसुमशयनान्याशुक्लान्तविसभङ्गसुरभीणि।**
**गुरुपरितापानि गात्राण्युपचारमर्हन्ति॥**[9]

नायको नायिकायाः प्रणयालसविह्वलां विशिष्टावस्थामवेक्ष्य वदति समाचारोऽनुपालनीयः। नायकः स्पष्टतो नायिकाया मुखचरणादीन् सस्पृहं साभिप्रायञ्चावलोकयन्निदमाह। पद्येऽस्मिन् सन्तापवद्भिरङ्गैर्नत्वया नायिकागतग्लान्यालस्यादयो नायकगतावेगौत्सुक्यादयश्च भावाः द्योतिताः। अलङ्कारा इव अनुरागे-ङ्गितान्यपि भवन्ति, येषामपि नायिकाया अलङ्कारेषु परिगणनं पारम्परिकैरिष्यते। साहित्यदर्पणदिशा मुग्धायाः कन्याया अनुरागेङ्गितमित्थं ज्ञेयम्-

**दृष्ट्वा दर्शयति व्रीडां सम्मुखं नैव पश्यति।**
**प्रच्छन्नं वा भ्रमन्तं वाति क्रान्तं पश्यति प्रियम्॥**
**बहुधा पृच्छमानाऽपि मन्दमन्दमधोमुखी।**
**सगद्गद्स्वरं किञ्चित् प्रियं प्रायेण भाषते॥**
**अन्यैः प्रवर्तितां शश्वत् सावधाना च तत्कथाम्।**
**शृणोत्यन्यत्र दत्ताक्षी प्रिये बालानुरागिणी॥ १**[10]

प्रेमपरायणा मुग्धा बाला च नायिका विलोकिता सलज्जा भवति, प्रच्छन्नतया प्रियं पश्यति, दूरतया वा, अन्यैरुच्यमानां प्रियकथां सस्पृहं शृणोति किन्तु तस्या दृष्टिरन्यत्र भवतीत्यादिचेष्टितानि प्रमुखानि सम्भवन्ति। नायिकायां शकुन्तलायामेवंविधानाचेष्टि-तानामिङ्गितादीनां स्थितिरवलोक्यते, यमात्रायिकात्वं तस्याः शकुन्तलाया आमण्डितं भवति। तन्निदर्शनीभूतमेतत्पद्यं यथा शाकुन्तलीयम्-

**अभिमुखे मयि संहृतमीक्षितं हसितमन्यनिमित्तकृतोदयम्।**
**विनयवारितवृत्तिरतस्तया न विवृतो मदनो न च संवृतः॥**[11]

एवमेव दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे ११ इत्यादि पद्येऽपि इङ्गितादिमूलकं नायिकायाः प्रागल्भ्यं (इदमपि नायिकालङ्कारेषु दशरूपककृता परि-गणितमन्यैश्चापि) सुव्यक्तमभवत्। उपर्युक्तानां नायिकालङ्काराणां स्थितिः सर्वात्मना शकुन्तलायां प्रतिफलिता इति सनिदर्शनमत्र निर्देष्टुं प्रयतितम्। सकलनायिकासम-वाये कालिदासस्येयं नायिका शिरोमणिरिवसमालोचकैराद्रियते। कालि-दासोऽपि इमां शकुन्तलां नायिकारूपेण समनुवर्ण्य परवर्तिनां कृते नायिकोचितमादर्शमेव प्रास्तौदिति मे मतिः।

**निष्कर्षः -**

उपर्युक्तविमर्शेन स्पष्टतया अवगम्यते यत् महाकविना कालिदासेन अभिज्ञानशाकुन्तले नायिकालङ्काराणां समुचितं, सूक्ष्मं च निरूपणं कृतम्। शकुन्तला नाम नायिका न केवलं रूपसौन्दर्येण, अपि तु स्वभावमाधुर्येण, भावगाम्भीर्येण, तथा च मनोवैज्ञानिकसूक्ष्मतया अपि अलङ्कृता दृश्यते। तस्याः अयत्नजाः, स्वभावजाश्चालङ्काराः यथावत् नाटके विविधेषु प्रसङ्गेषु सजीवमिव प्रतीयन्ते। माधुर्य, शोभा, कान्ति, दीप्ति, विलासादयः भावाः न केवलं वर्णिताः, किन्तु पात्रचेष्टासु स्वाभाविकतया प्रस्फुटिताः सन्ति।

एवं कालिदासस्य काव्यकौशलं नारीस्वभावस्य गूढतत्त्वानां च सुस्पष्टप्रकाशने परिलक्षितम्। शकुन्तला आदर्शा नायिका इति स्थापितुं कविना नायिकालङ्काराणां यथोचितं विनियोगः कृतः। अतः अभिज्ञानशाकुन्तलं नाटकमिदं नायिकावर्णनस्य दृष्ट्या अनुपमे-यमादर्शग्रन्थत्वेन स्वस्थानं धारयति इति निष्कर्षः।

**सन्दर्भ –**


१. दशरूपकम् – धनञ्जयः, संपादकः – काशीनाथपाण्डुरङ्गपरब्, निर्णयसागर-यन्त्रालयः, 1897

२. साहित्यदर्पणः- विश्वनाथः, प्रकाशकः – मोतिलालबनार-सीदासः, मुद्रकः - मुम्बै-संस्कृत-मुद्रणालयः, 1938

३. अभिज्ञानशाकुन्तलम्– महाकविकालिदासः,संपादकः– काशी-नाथपाण्डुरङ्गपरब्, निर्णयसागर-यन्त्रालयः, 1*912*

४. अभिज्ञानशाकुन्तल, सम्पा. रामानन्द शर्मा, चौखम्बा संस्कृत सीरिज आफिस, वाराणसी, चौखम्बा संस्कृत सीरिज अफिस, २००२

५. साहित्यदर्पण- विश्वनाथ, प्रकाश-हिन्दीव्याख्योपेता, चौखम्बा विद्याभवन, वाराणसी, १९८२ (तृ.सं.)


**पादटिप्पन्यः-**

1. दशरूपकम् - हजारीप्रसादद्विवेदः, २/३०-३३, ३५-३७
2. अभिज्ञानशाकुन्तलम् - (कान्तानाथशास्त्री तैलङ्गः) १/२०
3. शाकुन्तलम् - २/११
4. शाकुन्तलम् - १/२२
5. शाकुन्तलम् - १/२२, किशोरकेलिः
6. शाकुन्तलम् १, पृ० ५३
7. शाकुन्तलम् – ३/१०
8. शाकुन्तलम् - ३/१२
9. शाकुन्तलम् ३/२१
10. साहित्यदर्पण: - शशिकला, ३/१११-११३
11. साहित्यदर्पण: - शशिकला, ३/१११-११३